කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

**බාහිර විභාග අංශය**

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි තෘතීය පරීක්ෂණය (බාහිර) - 2009
2010 අගෝස්තු / සැප්තැම්බර්

මානවශාස්ත්‍ර පීඨය

සංස්කෘත - SANS –E3015

සංස්කෘත කාව්‍ය විචාරය හා නාට්‍ය විචාරය, බෞද්ධ සංස්කෘත සාහිත්‍යය

<u>පළමු ප්‍රශ්නයට හා තවත් ප්‍රශ්න හතරකට (04) පිළිතුරු සපයන්න.</u>

ප්‍රශ්න සංඛ්‍යාව : 08 යි　　　　　　　　　　　　කාලය : පැය 03 යි

---

01. මෙහි දක්වා ඇති සංස්කෘත පාඨ අතරින් **<u>හතරක්</u>** සිංහලයට පරිවර්තනය කරන්න.

I

गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥ ६ ॥

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥ ७ ॥

गुणदोषानशास्त्रज्ञः कथं विभजते जनः ।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु ॥ ८ ॥

अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः ।
वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् ॥ ९ ॥

काव्यादर्शः ।

## II

भक्तमाहुस्तमन्ये। अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः।यद्यपि च ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्रकाशितः - तथापि गुणवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक्स्पृष्टो लक्ष्यत इति परिकल्प्यैवमुक्तम् - भाक्तमाहुस्तमन्ये इति। केचित्पुनर्लक्षणकरणशालीनबुद्धयो ध्वनेस्तत्वं गिरामगोचरं सहृदयहृदयसंवेद्यमेव समाख्यातवन्तः। तेनैवंविधासु विमतिषु स्थितासु सहृदयमनःप्रीयते तत्स्वरूपं ब्रूमः। तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणीयसीभिश्चिरंतनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्। अथ च रामायणमहाभारतप्रभृतिनिलक्ष्ये सर्वत्र प्रसिद्धव्यवहारं। लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते।

ध्वन्यालोक

## III

तस्य द्वे अधिष्ठाने सम्भोगो विप्रलम्भश्च। तत्र सम्भोगस्तावद् ऋतुमाल्यानुलेपनालङ्कारेष्टजनविषयवरभवनोपभोगोपवनगमनानुभवनश्रवणदर्शनक्रीडालीलादिभिर्विभावैरुत्पद्यते। तस्य नयनचातुर्यभ्रूविक्षेपकटाक्षसञ्चारललितमधुराङ्गहारवाक्यादिभिरनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिणस्त्रासालस्यौग्र्यजुगुप्सावर्ज्याः। विप्रलम्भकृतस्तु निर्वेदग्लानिशङ्कासूयाश्रमचिन्तौत्सुक्यनिद्रासुप्तस्वप्नविबोधव्याध्युन्मादापस्मारजाड्यमोहमरणादिभिरनुभावैरभिनेतव्यः। अत्राह— यद्ययं रतिप्रभवः शृङ्गारः कथमस्य करुणाश्रयिणो भावा भवन्ति? अत्रोच्यते—पूर्वमेवाभिहितं सम्भोगविप्रलम्भकृतः शृङ्गार इति। [2]वैशिकशास्त्रैश्च दशावस्थोऽभिहितः। ताश्च सामान्याभिनये वक्ष्यामः।

नाट्यशास्त्रम्

## IV

मारा: कोटिसहस्र नेकनयुता गङ्गा यथा वालिकाः
ते तुभ्यं न समर्थ बोधिविटपाच्चालेतु कम्पेतु वा।
यज्ञा नैकविधाः सहस्रनयुता गङ्गा यथा वालिकाः
यष्टास्ते चरता हिताय जगतस्तेनेह विभ्राजसे ॥ ३९ ॥

नक्षत्रा सशशी सतारकरवी भूमौ पतेदम्बरात्
स्वस्थानाच्च चलेन्महागिरिवरः शुष्येदथो सागरः।
चतुरो धातव कश्चि विज्ञपुरुषो दर्शेय एकैकशः
नैव त्वं द्रुमराजमूलुपगतो अप्राप्य बोध्युत्थिहेत् ॥ ४० ॥

लाभा मह्य सुलब्ध वृद्धि विपुला दृष्टोऽसि यत्सारथे
पूजा चैव कृता गुणाश्च कथिता बोधाय चोत्साहितः।
सर्वा नागवधू अहं च ससुता मुच्येमितो योनितः
त्वं यासी यथ मत्तवारणगते गच्छेम एवं वयम् ॥ ४१ ॥ इति ॥

इति हि भिक्षवः कालिकस्य नागराजस्याग्रमहिषी सुवर्णप्रभासा नाम, सा संबहुलाभिर्नागकन्याभिः परिवृता पुरस्कृता नानारत्नछत्रपरिगृहीताभिः नानादूष्यपरिगृहीताभिर्नानामुक्ताहारपरिगृहीताभिः नानामणिरत्नपरिगृहीताभिः दिव्यमानुष्यकमाल्यविलेपनगुण्ठेपरिगृहीताभिः नानागन्धघटिकापरिगृहीताभिः नानातूर्यसंगीतिसंप्रवादितैर्नानारत्नपुष्पवर्षैर्बोधिसत्वं गच्छन्तमभ्यवकिरन्ति स्म ॥

ललितविस्तरे

XIX

V

विमुच्यता दृष्टिकृतानि सर्वशः शून्यांश्च धर्मानहु स्पर्शयित्वा ।
ततो विजानाम्यहु निर्वृतोऽस्मि न चापि निर्वाणमिदं प्रवुच्यति[1] ॥१२॥
यदा तु बुद्धो भवतेऽग्रसत्त्वः पुरस्कृतो नरमरुयक्षराक्षसैः ।
द्वात्रिंशतीलक्षणरूपधारी अशेषतो निर्वृतु भोति तत्र ॥१३॥
व्यपनीत सर्वाणि मि मन्यितानि श्रुत्वा च घोषं अहमद्य निर्वृतः ।
यदापि व्याकुर्वसि अग्रबोधौ पुरतो हि लोकस्य सदेवकस्य ॥१४॥
बलवच्च आसीन्मम छम्भितत्वं प्रथमं गिरं श्रुत्व विनायकस्य ।
मा हैव मारो स्य भवेद्विहेठको अभिनिर्मिनित्वा भुवि बुद्धवेषम् ॥१५॥

सद्धर्मपुण्डरीकसूत्रे - III

VI

कृते यः प्रतिकुर्वीत सो ऽपि तावत्प्रशस्यते ।
अव्यापारितसाधुस्तु बोधिसत्त्वः किमुच्यतां ॥३१॥

कतिपयजनसत्रदायकः कुशलकृदित्यभिपूज्यते जनैः ।
क्षणमशनकमात्रदानतः सपरिभवं दिवसार्धयापनात् ॥३२॥

किमु निरवधिसत्त्वसंख्यया निरवधिकालमनुप्रयच्छतः ।
गगनजनपरिक्षयाक्षयं सकलमनोरथसंप्रपूरणं ॥३३॥

इति सत्रपतौ जिनस्य पुत्रे कलुषं स्वे हृदये करोति यश्च ।
कलुषोदयसंख्यया स कल्पान् नरकेष्वावसतीति नाथ आह ॥३४॥

बोधिचर्यावतारे 1

VII

तस्मादर्थस्य लाभार्थं[a] लब्धस्य परिरक्षणे[b] ।
दृढं कुर्यासि व्यायामं धर्मेण मनुजाधिप[c] ॥११३॥
यो वै भूमिपतिर्देव अधर्मेणानुशासति ।
राष्ट्रं[d] स्य दुर्बलं[e] भोति च्छिद्रभूतं समन्ततः ॥११४॥
यो च भूमिपतिर्देव[f] धर्मेण[g] अनुशासति ।
राष्ट्रं[h] स्य स्थावरं[i] भवति ऋद्धं[j] स्फीतं जनाकुलं ॥११५॥
निगृह्णे[k] निगृहीतव्यं प्रग्रहार्हां[l] च प्रगृह्णे ।
संगृह्णे[m] संगृहीतव्यां[n] अनुग्रहरुचिर्भव ॥११६॥
यो निग्रहं न जानाति[o] प्रग्रहं वा जनाधिपः ।
संग्रहानुग्रहं चापि सो अर्थां परिहायति ॥११७॥

महावस्तु अवदानं

02. කාව්‍යාදර්ශයේ දැක්වෙන අන්දමට මහාකාව්‍ය ලක්ෂණ හඳුන්වා දෙන්න.

03. කාව්‍ය විචාර සංකල්පනාවන් අතර "ධ්වනි" සංකල්පයේ ඇති විශේෂතා පිළිබඳ විමසීමක් කරන්න.

04. භරතමුනිගේ නාට්‍ය ශාස්ත්‍රයට අනුව සතර අභිනය හඳුන්වා එකිනෙක පිළිබඳ විස්තර සපයන්න.

05. පහත සඳහන් වෘත්ත අතරින් **පහක** ලක්ෂ්‍ය - ලක්ෂණ පැහැදිලි කරන්න.

I. මාලතී
II. ප්‍රමුදිත වදනා
III. වංශස්ථ
IV. මාලනී
V. මන්දාක්‍රාන්තා
VI. වසන්තතිලකා
VII. උපෙන්ද්‍රවජ්‍රා
VIII. දොධක
IX. ශ්‍රග්ධරා
X. උපජාති

06. බුදුසිරිතේ අසිරිමත් සිදුවීම් සුලලිත ශෛලියකින් විදහා දක්වා තිබෙන ආකාරය ලලිත විස්තරය ඇසුරෙන් නිදසුන් සහිතව පෙන්වා දෙන්න.

07. ක්ෂීණාශ්‍රව අර්හත්භාවය පරිපූර්ණ විමුක්තියක් නොවන බවට සද්ධර්මපුණ්ඩරීක සූත්‍රය ඉදිරිපත් කරන මතවාදය විමර්ශනය කරන්න.

08. "බෝධිසත්ව චර්යාව යනු පරාර්ථ චර්යාවයි." බෝධිචර්යාවතාරය ඇසුරින් විමසන්න.

***************************